# स्वामिसारदानन्दकृतः श्रीश्रीरामकृष्णलीलाप्रसङ्गः

अनुवादकौ– डॉ. राकेशदाशः, शान्तनुनायेकः

## प्रथमः खण्डः– द्वितीयः अध्यायः (कामारपुकुरम् पितृपरिचयश्च)

### दरिद्रगृहे ईश्वरस्य अवतरणाय हेतुः

ईश्वरावताररूपेण ये महापुरुषाः अधुना जगति पूज्यन्ते, भगवन्तं श्रीरामचन्द्रं शाक्यसिंहं च विहाय तेषां सर्वेषां पार्थिवं जीवनं दुःख-दरिद्रताभ्याम् अर्थाभावेन तथा कष्टेन आरब्धम् इति दृश्यते। यथा– क्षत्रियराजकुलम् अलङ्कृतवतः अपि श्रीकृष्णस्य जन्म कारागारे अभवत्। बाल्यजीवनं च श्रीकृष्णेन आत्मीयेभ्यः स्वजनेभ्यः दूरम् अवरे गोपकुले अतिवाहितम्। श्रीभगवान् येशुक्रिस्तः पान्थशालायां पशुशालायां दरिद्रयोः पित्रोः क्रोडम् उज्ज्वलं कृतवान्। श्रीभगवान् श्रीशङ्कराचार्यः दरिद्रायाः विधवायाः पुत्ररूपेण अवततार। श्रीभगवान् श्रीकृष्णचैतन्यः नगण्यसाधारणजनस्य गृहे अजायत। इस्लाममतप्रवर्तकस्य श्रीमतः महम्मदस्य जीवनम् अपि तथैव आसीत्। तथापि दुःखदारिद्र्यसत्त्वे अपि यत्र सन्तोषस्य सरसता नास्ति, अर्थाभावे अपि यत्र निःस्वार्थता प्रेम च नास्ति, ययोः दरिद्रयोः पित्रोः हृदये त्यागः, पवित्रता तथा कठोरमानवीयगुणैः सह कोमलत्व-दया-दाक्षिण्यादीनां भावसमूहानां मधुरं सङ्गमनं नास्ति, तत्र ते कदापि जन्म न गृहीतवन्तः।

इत्थं विचार्यमाणे, पूर्वोक्तविधया सह तेषां भाविजीवनस्य कश्चन गूढः सम्बन्धः परिलक्ष्यते। यतो हि यौवने वार्धक्ये च ये समाजस्य दुःखिनां, दरिद्राणां, निपीडितानां च अश्रु प्रक्षाल्य हृदये शान्तिं नियच्छन्ति, ते तादृशानां भावेन सह पूर्वम् एव परिचिताः सहानुभूतिसम्पन्नाश्च न अभविष्यन् चेत् सर्वाणि तानि कार्याणि कथम् असाधयिष्यन्? तावद् एव न। वयम् इतः पूर्वं दृष्टवन्तः यत् संसारे धर्मग्लानिनिवारणाय एव सर्वेषाम् अवतारपुरुषाणाम् उदयः भवति। तत् कार्यं समापयितुं ते पूर्वप्रचारितानां सर्वेषां धर्मविधानानां यथार्थावस्थया सह आदौ एव परिचिताः स्युः। अपि च तेषां सर्वेषां प्राचीनविधीनां साम्प्रतिकग्लानेः कारणस्य आलोचनपूर्वकं तेषां पूर्णतासम्पादनाय साफल्यविधानाय च देशकालोपयोगि नूतनं विधानम् आविष्कर्तव्यम्। तत्परिचयलाभस्य विशेषावसरं दरिद्रस्य कुटीरम् अतिरिच्य धनिनः प्रासादः कदापि न कल्पयति। यतो हि सांसारिकसुखभोगात् वञ्चितः दरिद्रः जनः एव ईश्वरं तस्य विधानञ्च जीवनस्य प्रधानावलम्बनरूपेण सर्वदा दृढम् आलिङ्गति। अत एव सर्वत्र धर्मग्लानिः उपस्थिता चेद् अपि पूर्वपूर्वविधानानां लेशः तदापि दरिद्रस्य कुटीरम् आलोकितं करोति। किञ्च, प्रायः तस्माद् एव कारणाद् जगद्गुरवः सर्वे महापुरुषाः जन्मग्रहणकाले दरिद्रपरिवारेणैव आकृष्टाः भवन्ति।

येषां महापुरुषाणां कथां वयं वक्तुकामाः, तेषां जीवनारम्भः अपि पूर्वोक्तनियमं नातिक्राम्यति।

### श्रीरामकृष्णदेवस्य जन्मभूमिः कामारपुकुरम्

हुगलिमण्डलस्य नैर्ऋतभागे, यत्र वाँकुडामेदिनीपुरयोः द्वयोः मण्डलयोः मेलनम् अभवत्, तस्मात् सन्धिस्थलाद् अनतिदूरं त्रयः ग्रामाः त्रिकोणाकृत्या मिथः सन्निहिताः। ग्रामवासिनां कृते त्रयः ग्रामाः श्रीपुर-कामारपुकुर-मुकुन्दपुर-रूपेण भिन्नैः त्रिभिः नामभिः परिचिताः चेद् अपि तेषां तथा नैकट्यं वर्तते यत् एकस्यैव ग्रामस्य पल्लीत्रयरूपेण तेषु भ्राम्यन्ति पथिकाः। तेन कारणेन परितः सर्वेषु

ग्रामेषु ते ग्रामाः कामारपुकुर इति नाम्नैव प्रसिद्धिं गताः। तत्रत्याः सर्वे भूस्वामिनः बहुकालं यावत् तस्मिन्नेव ग्रामे वसन्ति, तस्माद् एव कारणात् प्रायः कामारपुकुरस्य पूर्वोक्तं सौभाग्यम् उदियाय। वयं यस्य कालस्य विषये कथयामः तस्मिन् काले कामारपुकुरं श्रीमतः वर्धमानमहाराजस्य गुरुवंशीयानाम् अग्रहारभूतः आसीत्। किञ्च तेषां वंशधराः श्रीयुक्ताः गोपीलाल-सुखलालप्रभृतयः गोस्वामिनः[१] तस्मिन् ग्रामे निवासम् अकुर्वन्।

कामारपुकुरात् वर्धमाननगरं प्रायः द्वात्रिंशत्-मीलमिते दूरे उत्तरस्यां दिशि वर्तते। तस्मात् नगरात् आगमनाय पक्कः मार्गः वर्तते। कामारपुकुरस्य आगमनाद् अनन्तरमेव सः मार्गः न समाप्यते, तस्य ग्रामस्य अर्धं वेष्टित्वा सः मार्गः दक्षिणपूर्वम् अभि पुरीधाम यावत् गतः। पादचारिणां, दरिद्रपथिकानां, सर्वेषां वैराग्यवतां साधूनां च बहवः तेन पथा श्रीश्रीजगन्नाथं द्रष्टुकामाः यातायातं कुर्वन्ति।

कामारपुकुरस्य पूर्वतः प्रायः नवदशेभ्यः क्रोशेभ्यः दूरं तारकेश्वरमहादेवस्य प्रसिद्धं मन्दिरं विराजते। तस्मात् स्थानात् द्वारकेश्वरनदस्य तटे जाहानावाद-आरामवागयोः मध्ये कामारपुकुरागमनाय एकः पन्थाः विद्यते। तद् विहाय प्रोक्तग्रामस्य प्रायः नवक्रोशेभ्यः दक्षिणतः घाटालग्रामात् प्रायः त्रयोदशक्रोशेभ्यः प्रतीच्यां वनविष्णुपुराद् अपि अत्र आगमनाय प्रशस्तः मार्गः वर्तते।

[१] स्वर्गतः हृदयराममुखोपाध्यायः अस्मान् सुखलालस्य स्थाने अनुपगोस्वामिनः नाम उक्तवान् आसीत्; परन्तु प्रायः तत् समीचीनं नास्ति। ग्रामस्य इदानीन्तनानां भूस्वामिनां लाहामहोदयानां सकाशात् अशृणवं यत्, उक्तस्य गोस्वामिमहोदयस्य नाम सुखलालः आसीत्, अपि च तत्पुत्रस्य कृष्णलालगोस्वामिनः सकाशाद् एव ते प्रायः पञ्चाशतः वर्षेभ्यः पूर्वं कामारपुकुरस्य अधिकं भूभागम् अक्रीणन् इति। पुनः ग्रामे प्रवादः वर्तते यत्, गोपेश्वरनामकस्य बृहतः शिवलिङ्गस्य प्रतिष्ठाम् अकरोत् गोपीलालगोस्वामी। अत एव गोपीलालगोस्वामी सुखलालस्य कश्चित् पूर्वपुरुषः आसीद् इति अनुमीयते। अथवा एतद् अपि भवितुम् अर्हति यत्, सुखलालस्य अपरं नाम आसीत् गोपीलालः इति।